श्री काळी एकाक्षरी (चिंतामणि)

श्री काळी एकाक्षरी (चिंतामणि)

श्रीगणेशाय नमः | श्रीगुरुभ्यो नमः | हरिः ॐ |

शुचिः –
अपवित्रः पवित्रोवा सर्वावस्थां गतोऽपि वा |
यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः | |
पुंडरीकाक्ष पुंडरीकाक्ष पुंडरीकाक्ष | |

आचम्य –
क्रीं | क्रीं | क्रीं | (इति त्रिवारं जलं पिबेत्)
ॐ काळ्यै नमः | (ओष्टौ प्रक्षाळ्य)
ॐ कपालिन्यै नमः | (ओष्टौ)
ॐ कुल्लयै नमः | (हस्तप्रक्षाळनं)
ॐ कुरुकुल्लायै नमः | (मुखं)
ॐ विरोधिन्यै नमः | (दक्षिण नासिका)
ॐ विप्रचित्तायै नमः | (वाम नासिका)
ॐ उग्रायै नमः | (दक्षिण नेत्रं)
ॐ उग्रप्रभायै नमः | (वाम नेत्रं)
ॐ दीप्तायै नमः | (दक्षिण कर्णं)
ॐ नीलायै नमः | (वाम कर्णं)
ॐ घनायै नमः | (नाभिं)
ॐ बलाकायै नमः | (हृदयं)
ॐ मात्रायै नमः | (मस्तकं)
ॐ मुद्रायै नमः | (दक्षिण स्कंधं)
ॐ मितायै नमः | (वाम स्कंधं) | |प्रार्थना| |

गुरु प्रार्थना –
अखंडमंडलाकारं व्याप्तं येन चराचरं |
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः | |
ज्ञानशक्तिसमारूढः तत्त्वमालाविभूषितः |

भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ||
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः |
गुरुस्साक्षात् परब्रह्म तस्मै श्री गुरवे नमः ||

श्रीगणेश प्रार्थना –
विघ्नेश्वराय वरदाय सुरप्रियाय
लंबोदराय सकलाय जगद्धिताय |
नागाननाय श्रुतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ||
वक्रतुंड महाकाय सूर्यकोटिसमप्रभ |
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ||

श्रीदक्षिणामूर्ति प्रार्थना –
भस्मं व्यापांडुरांग शशिशकलधरो ज्ञानमुद्राक्षमाला
वीणापुस्तेर्विराजत्करकमलधरो लोकपट्टाभिरामः |
व्याख्यापीठेनिषण्णा मुनिवरनिकरैः सेव्यमान प्रसन्नः
सव्यालकृत्तिवासाः सततमवतु नो दक्षिणामूर्तिमीशः ||

श्रीमहाकालभैरव प्रार्थना –
महाकालं यज्जेद्देव्या दक्षिणे धूम्रवर्णकं
बिभ्रतं दंडखट्वांगौ दंष्ट्राभीममुखं शिशुं |
त्रिनेत्रमूर्ध्वकेशं च मुंडमालाविभूषितं
जटाभारलसच्चंद्रखंडमुग्रं ज्वलन्निभं ||संकल्पं||
ॐ विष्णुर्विष्णुर्विष्णुः | ॐ तत्सत् श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य श्रीब्रह्मणोऽह्नि द्वितीय परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे, अष्टाविंशतितमे कलियुगे, कलिप्रथम चरणे जंबूद्वीपे भरतखंडे भारतवर्षे पुण्यभूप्रदेशे ___ प्रदेशे ___ संवत्सरे ___ अयणे ___ ऋतुः ___ मासे ___ पक्षे ___ तिथौ, ___ वासरे ___ गोत्रोत्पन्न ___ नामधेयाहं श्रीकाळिका देवी प्रीत्यर्थं क्रीमिति एकाक्षरी मंत्रजपं करिष्ये ||प्राणानायम्य||
क्रीं (इति बीजेन त्रिवारं प्राणायामं कुर्यात्) ||अथ काळी कवचं||
श्री दक्षिणकाळिका कवचं पठतु ||अथ काळी हृदयं||
श्री दक्षिणकाळी हृदयं पठतु ||मंत्र विनियोगः||
अस्य श्री काळी एकाक्षरी मंत्रस्य भैरव ऋषिः उष्णिक् छंदः श्री दक्षिणकालिका देवता कं बीजं ईं शक्तिः रं कीलकं सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः |

ऋष्यादि न्यासः –

ॐ भैरव ऋषये नमः शिरसि |

उष्णिक् छंदसे नमः मुखे |

दक्षिणकाळिका देवतायै नमः हृदि |

कं बीजाय नमः गुह्ये |

ईं शक्तये नमः पादयोः |

रं कीलकाय नमः नाभौ |

विनियोगाय नमः सर्वांगे |

करन्यासः –

ॐ क्रां अंगुष्ठाभ्यां नमः |

ॐ क्रीं तर्जनीभ्यां नमः |

ॐ क्रूं मध्यमाभ्यां नमः |

ॐ क्रैं अनामिकाभ्यां नमः |

ॐ क्रौं कनिष्ठिकाभ्यां नमः |

ॐ क्रः करतलकरपृष्ठाभ्यां नमः |

हृदयादिन्यासः –

ॐ क्रां हृदयाय नमः |

ॐ क्रीं शिरसे स्वाहा |

ॐ क्रूं शिखायै वषट् |

ॐ क्रैं कवचाय हुं |

ॐ क्रौं नेत्रत्रयाय वौषट् |

ॐ क्रः अस्त्राय फट् |

ॐ भूर्भुवस्सुवः इति दिग्बंधः |

व्यापक न्यासः- क्रीं (इति मंत्रेण त्रिवारं व्यापकं कुर्यात्)

ध्यानं |

कराळवदनां घोरां मुक्तकेशीं चतुर्भुजां |

काळिकां दक्षिणां दिव्यां मुंडमालाविभूषितां || 1 ||

सद्यश्छिन्नशिरः खड्गवामाधोर्ध्वकरांबुजां |
अभयं वरदं चैव दक्षिणोर्ध्वाधपाणिकां || 2 ||

महामेघप्रभां श्यामां तथा चैव दिगंबरीं |
कंठावसक्तमुंडाली गलद्रुधिरचर्चितां || 3 ||

कर्णावतंसतानीत शवयुग्मभयानकां |
घोरदंष्ट्रां कराळास्यां पीनोन्नतपयोधरीं || 4 ||

शवानां करसंघातैः कृतकांची हसन्मुखीं |
सृक्कद्वयगलद्रक्तधारा विस्फुरिताननां || 5 ||

घोररावां महारौद्रीं श्मशानालयवासिनीं |
बालार्कमंडलाकार लोचनत्रितयान्वितां || 6 ||

दंतुरां दक्षिणव्यापि मुक्तालंबिक चोच्चयां |
शवरूपमहादेवहृदयोपरिसंस्थितां || 7 ||

शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्वितां |
महाकालेन च समं विपरीत रतातुरां || 8 ||

सुखप्रसन्नवदनां स्मेराननसरोरुहां |
एवं संचिंतयेत् काळीं सर्वकामसमृद्धिदां || 9 ||

लमित्यादि पंचपूजा –
ॐ क्रीं काळिकायै नमः लं पृथ्वीतत्त्वात्मकं गंधं काळिका देवी प्रीतये समर्पयामि |
ॐ क्रीं काळिकायै नमः हं आकाशतत्वात्मकं पुष्पं काळिका देवी प्रीतये समर्पयामि |
ॐ क्रीं काळिकायै नमः यं वायुतत्त्वात्मकं धूपं काळिका देवी प्रीतये आघ्रापयामि |
ॐ क्रीं काळिकायै नमः रं वह्नितत्वात्मकं दीपं काळिका देवी प्रीतये दर्शयामि |
ॐ क्रीं काळिकायै नमः वं जलतत्त्वात्मकं नैवेद्यं काळिका देवी प्रीतये निवेदयामि |
ॐ क्रीं काळिकायै नमः सं सर्वतत्त्वात्मकं सर्वोपचाराणि मनसा परिकल्प्य काळिका देवी प्रीतये समर्पयामि |

कुल्लुकादि मंत्राः –
1। कुल्लुका – क्रीं हूं स्त्रीं ह्रीं फट् (शिखा स्थाने द्वादशवारं जपेत्)
2। सेतुः – ॐ (इति हृदये स्थाने द्वादशवारं जपेत्)

3। महासेतुः – क्रीं (इति कंठस्थाने द्वादशवारं जपेत्)

4। मुखशोधन – क्रीं क्रीं क्रीं ॐ ओं ॐ क्रीं क्रीं क्रीं(इति सप्तवारं जपेत्)

5। निर्वाण – ॐ अं क्रीं ऐं | अं आं इं ईं उं ऊं ऋं ॠं लुं* लूं* एं ऐं ॐ औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं क्षं ॐ (इति नाभिं स्पृशेत्)

6। प्राणयोग – ह्रीं क्रीं ह्रीं (इति हृदये सप्तवारं जपेत्)

7। दीपनी – ॐ क्रीं ॐ (इति हृदये सप्तवारं जपेत्)

8। निद्राभंगः – ई क्रीं ई (इति हृदये स्थाने दशवारं जपेत्)

9। अशौचभंगः – ॐ क्रीं ॐ (इति हृदये सप्तवारं जपेत्)

10। गायत्री – ॐ काळिकायै च विद्महे श्मशानवासिन्यै धीमहि तन्नोऽघोरा प्रचोदयात् | (इति हृदये त्रिवारं जपेत्)

एकाक्षरी मंत्रः – क्रीं |

उत्तरन्यासः –

ॐ क्रां हृदयाय नमः |

ॐ क्रीं शिरसे स्वाहा |

ॐ क्रूं शिखायै वषट् |

ॐ क्रैं कवचाय हुं |

ॐ क्रौं नेत्रत्रयाय वौषट् |

ॐ क्रः अस्त्राय फट् |

भूर्भुवस्सुवरोमिति दिग्विमोकः |

जपसमर्पणं –

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं |

सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ||

सर्वं श्रीमहाकाळ्यर्पणमस्तु |

क्षमायाचना –

अपराधसहस्राणि क्रियंतेऽहर्निशं मया |

दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि || 1 ||

आवाहनं न जानामि न जानामि विसर्जनं |

पूजां चैव न जानामि क्षम्यतां परमेश्वरि || 2 ||

मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि |

यत्पूजितं मया देवि परिपूर्णं तदस्तु मे || 3 ||

बलि मंत्रः – क्रीं काळीं नारिकेळ/जंबीर बलिं समर्पयामि नमः |

होम मंत्रः – क्रीं स्वाहा |

तर्पण मंत्रः – क्रीं नमः काळिकां तर्पयामि स्वाहा |

मार्जन मंत्रः – क्रीं काळिका देवीं अभिषिंचामि नमः |